N.A.

Jagadishyavachhedakatwa nirukti

जागदीशयवच्छेदकत्व निरुक्ति:

Sanskrit

Paper- Handwritten

N.A. (Very old)

1+10 folio

13"x5"

Incomplete

१२९ / F.06

६ ८ नं ६४



जागदीशयवच्छेदकत्वनिरुक्तिः (काशीशांकरी)

श्रीगणेशाय नमः समारब्धानुमानमाप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानंव्या
प्तिस्वरूपनिरूपणमारभते न तावदित्यादिना साध्याभाववदवृत्तित्वस्याव्याप्यवृत्तिसाध्य
कसद्धेतावव्याप्तिमाशंक्याह साध्यवद्भिन्नेति॥ साध्यवद्भिन्ने यः साध्याभाववांस्तदवृत्ति
त्वमित्यर्थः। कपिसंयोगाद्यभावस्याधिकरणत्वे मानाभावादाह साध्यवदिति हेतोः साध्यवत्पक्ष
भिन्नदृष्टान्तवृत्तित्वेनाव्याप्तेराह सकलेति साकल्यं साध्याभाववति साध्येचबोध्यम् साध्याभा
वो वा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको ग्राह्यः

श्रीगणेशाय नमः श्रीविश्वनाथाय नमः जागदीश्यवच्छेदकत्वनिरुक्तिटिप्पणिकालिशंकरिप्रारभ्यः॥ नन्ववच्छेदकत्वमिह न स्वरूपसम्बन्धविशेषः सम्भवति चलनो धर्मे गुरौ तदभावात् इति शिरोमणिः॥ साधनसमानाधिकरणाभावप्रतियोगिस्वरूपसम्बन्धरूपावच्छेदकत्वमेतल्लक्षणघटकत्वाभाववत् व्यभिचारिवृत्तित्वात् व्यभिचावृत्तित्वं च सम्पादकतासम्बन्धेनेति केचित् तादृशस्वरूपसम्बन्धरूपावच्छेदकत्वघटितसामानाधिकरण्यं नानुमितिजनकतायाम् विषयविधयाऽवच्छेदकम् व्यभिचारिवृत्तित्वात् इति भट्टाचार्याभिमतः समुदितार्थः जगदीशस्यापितत्पूर्वेव तात्पर्यमिति ध्येयम्॥१॥ विशिष्टसत्तात्वसमनियतस्य सत्तात्वस्य गुणेऽपि न विशिष्टाभावप्रतियोगितावच्छेदकत्वं गुणादावपि सत्ता नास्तीति प्रतीतिप्रसंगात् इति जगदीशः विशिष्टसत्ताभाववत्ताया विशिष्टसत्तात्वावच्छिन्नाधिकरणतायास्समं विशिष्टत्वमित्यभिप्रायेण दमुक्तमन्यथा सत्तात्वावच्छिन्नप्रतियोगिताभाववत्तायास्सत्तात्वावच्छिन्नाधिकरणतायास्समं विशिष्टत्वे उक्तविशिष्टाभावव्य

।२। कैरपिसत्तात्वावच्छिन्नाभाववत्तापागुणेपिसत्तात्वावच्छिन्नाधिकरणतासत्वेन गुणेसत्तानास्तीतिप्रतित्यापत्तिदानस्यासं
अं कांगत्यापत्तिरिति॥२॥पृथिविसमवेतत्वासमनियतस्यापिसमवेतत्वस्यपृथिवीसमवेतत्वाभावप्रतियोगितावच्छेदकत्वम
नतिप्रसंगादितिपृथवीनिरूपितसमवेतत्वोपलक्षिताभावप्रतियोगितावच्छेदकं समवेतत्वं ननु विशिष्टाभावस्येति
तथासतिजलादावपिसमवेतत्वविशिष्टाभाववगाहिप्रत्यापत्तिरिति॥ अथात्रपृथिवीनिरूपितत्वस्यसमवेतत्वांशे
उपलक्षणतयाअवच्छेदकत्वाभावात् कुतोलाघवमितिजगदीशमते अवच्छेदककोट्यन्तर्गतोपलक्षणस्याव
च्छेदकत्वाभावादित्यसिद्धान्तत्वादितिचेन्न आधेयतासम्बन्धेन पृथिवीनिरूपितत्वस्यसमवेतांशे उपल
क्षणत्वादितिभावः अभिप्रायः॥३॥ अथकम्बुग्रीवादिमत्वानुप्रमेयत्वादित्यादौ हेतुमन्निष्ठाभावप्रतियोगि
तावच्छेदकघटत्वादिभिन्नत्वस्यसाध्यतावच्छेदकेसत्वादतिव्याप्तिरिति। ननुकम्बुग्रीवादिनाशक्षणेयत्र
कम्बुग्रीवादिमान्नास्तीतिप्रत्ययस्तत्रचघटोनास्तीतिअप्रत्ययेनकथं कम्बुग्रीवादिमान्नास्तीत्यभावप्रति

॥२॥ योगितावच्छेदकं घटत्वमिति चेन्न कम्बुग्रीवादिमत्त्वोपलक्षिताभावप्रतियोगितावच्छेदकत्वस्य घटत्वे सत्त्वादिति।
अं० का०॥ नच तथाप्यतिप्रसंगभयेन कम्बुग्रीवादिविशिष्टाभावप्रतियोगितावच्छेदकघटत्वाद्यावस्वीकारेण तादृशा
भावप्रतियोगितावच्छेदकत्वमादायैवातिव्याप्तिवारणसम्भवान्नेदं युक्तमिति वाच्यं उपलक्षितस्थले उपल
क्षिताभावस्य विशिष्टसाध्यकस्थले विशिष्टाभावस्य घटकत्वादिति गुणकर्मत्वोपलक्षितसत्तासाध्य
कजातिमत्त्वादिहेतावव्याप्तेः गुणकर्मान्यत्वविशिष्टसत्ताभावप्रतियोगितावच्छेदकत्वस्य साध्यता
वच्छेदके सत्वात् जन्यतासम्बन्धेन कम्बुग्रीवादिविशिष्टस्य साध्यताभिप्रायेणेदं तथा च जन्यतासम्बन्धेन
विभिन्नकालीनवस्तुन आधाराधेयभावानभ्युपगमात्तादृशसम्बन्धेन कम्बुग्रीवादिविशिष्टा
भावस्य प्रतियोगितावच्छेदकत्वमस्य घटत्वे सत्वात् कम्बुग्रीवादिनानास्थलावच्छेदेन भूतलादावस्य
सत्वात् - यथाश्रुतमेव सम्यगित्यपि कश्चित्॥४॥ नच कम्बुग्रीवादिमत्त्वं कम्बुग्रीवादिव्यक्तिरेव सा च
प्रत्येकं हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकैव कुतोतिव्याप्तिरिति वाच्यम् - परम्परया संस्थानगत

कम्बुग्रीवात्वादिजातिमत्त्वस्यैव साध्यतावच्छेदकत्वादिति जगदीशः। अथात्र लक्षणे साध्यतावच्छेदकतावच्छेदकतदितरोभयान
वच्छिन्नत्वस्यावच्छेदकतायां निवेशेन तत्र कम्बुग्रीवादिविशिष्टाभावस्य लक्षणघटकत्वादिति चेन्न तत्त्वोपलक्षितकम्बुग्री
वादिमदभावप्रतियोगिमात्रपैनातिव्याप्तिवारणसम्भवादिति ध्येयम्॥ न च तत्त्वोपलक्षितकम्बुग्रीवादिमदभावप्र
तियोगितावच्छेदकं न घटनिष्ठतद्व्यक्तित्वमेव लाघवादिति वाच्यम् जगदीशमते तत्तत्कम्बुग्रीवादिमत्त्वस्यैव स्वरूपतो
वच्छेदकत्वादिति चेत् कम्बुग्रीवादिमत्त्वस्यावयवसंयोगरूपत्वेन स्वाश्रयसमवेतत्वसम्बन्धेन कम्बुग्रीवादिमत्त्व
स्य प्रतियोगितावच्छेदकत्वोपलक्षिततया साक्षात्सम्बन्धेन तद्व्यक्तित्वस्यातिरिक्तावच्छेदकत्वमिति वाच्यम्। तद्व्य
क्तित्वस्य घटतादात्म्यविशिष्टसमवायेन घटत्वाद्व्यक्त्यात्मकतया तादृशसम्बन्धेन घटादिनिष्ठतद्व्यक्ति
त्वस्यावच्छेदकत्वस्वीकारेऽपि लाघवानवकाशादिति॥५॥ घ्राणग्राह्यगुणत्वं घ्राणग्राह्यत्वे सति गुणत्वव्या
पकजातिमत्त्वस्य विशेषणत्वस्य बोध्यम् अत्र घ्राणग्राह्यगुणवृत्तिव्यापकजातिमत्त्वं तादृशजात्यधिक
रणत्वं तच्च तादृशजातेर्भेदेऽपि एकमेव साध्यतावच्छेदकं तस्य नानात्वे तु सर्वस्यैव साध्यताव

च्छेदकसाधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वादिति॥ परन्तु॥ विशिष्टसाध्यकस्थले साध्यतावच्छेदकता
वच्छेदकं हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतानवच्छेदकं तदवच्छिन्नविशिष्टसामानाधिकरण्यं व्या
प्तिरित्यभिप्रायेणेदम्॥ तथा च साध्यतावच्छेदकघ्राणग्राह्यत्वविशिष्टगुणत्वाव्यापकजातिमत्वस्य सा
साधनवन्निष्ठाभावप्रतियोगितावच्छेदकतानवच्छेदकत्वेनातिव्याप्तिर्व्यापारित्याहुः॥ ध्या॥
तथाभ्राविध्याभानीयप्रतियोगितासामान्यशून्यत्वाप्रमप्रसिद्ध्यम् सर्वस्यैव वस्तुनस्तादृशयावत्त्वावच्छिन्नप्रतियोगितास
त्वात् अत उक्तम्॥ यत्किंचिदिति॥ समनियताभावयोरैक्यानुपगमात्॥ तेन घटादिसान्याभावस्यैव घटादि
निरूपितसंयोगेनप्रमेयसामान्याभावतया पुनर्न प्रसिद्धिरिति जगदीशः॥ ननु कथमिदमुक्तम् समनिय
ताभावयोरैक्यस्वीकारेपि समवायेन वन्हत्वभावमादायाव्याप्तिवारणार्थम् साध्यतावच्छेदकसम्बन्धाव
च्छिन्नत्वं प्रतियोगितायां निवेश्यं तथा च शुद्धनावच्छिन्नं यद्घटनिष्ठप्रतियोगित्वं तत्प्रतियोगितासामा
न्यत्वस्याप्रसिद्धत्वात् घटादिनिरूपितसंयोगिसम्बन्धावच्छिन्नप्रतियोगित्वं साध्यतावच्छेदकसम्बन्धाव

।३। च्छिन्नत्वविरहादिति चेदत्र केचित्तु यत्र संयोगेन द्रव्यस्य साध्यता प्रमेयत्वादिकं हेतुस्तत्रातिव्याप्तिः संयोगे
अ॰ का॰ न द्रव्याभावसंयोगसम्बन्धेन प्रमेयसामान्याभावयोरैक्यात् साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नप्र
तियोगिभिन्नं प्रतियोगित्वं तत्सामान्यशून्यत्वाप्रसिध्या तादृशाभावस्य लक्षणाघटकत्वेन साध्यतावच्छेद
कसंयोगसम्बन्धेन घटाभावस्यैव सौलभ्यात्तत्प्रतियोगितासामान्यशून्यावृत्तिभिन्नत्वस्य साध्यता
वच्छेदकसत्वादिति तादृशप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वमपहाय तत्सम्बन्धा
वच्छिन्नप्रतियोगिताकत्वमभावे (विशेषणीयं) विवक्षणीयं ।। तथाच द्रव्यवान्प्रमेयत्वादित्यादावप्र
सिद्धिनिबन्धनैव नातिव्याप्तिः साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकस्य घटाद्यभावस्यापि
घटादिनिरूपितसंयोगेन प्रमेयसामान्याभावतया तादृशप्रतियोगितासामान्यशून्यत्वाप्रसिध्या
सम्भववारणाय तदुक्तमित्याहुस्तन्मन्दम् ।। समवायसम्बन्धावच्छिन्नप्रतियोगितासामान्यशून्य
त्वाप्रसिध्या भावान्तरप्रतियोगितासूनतिरिक्तवृत्तित्वस्य साध्यतावच्छेदकसत्वेन प्रमेयसा

ध्यकवाच्यत्वादिहेतावतिव्याप्तिवारणाय यद्धर्मव्यापकतावच्छेदकं तादृशप्रतियोगितावच्छेदकतद्धर्म एव पारिभाषिकावच्छे
दकमिति वक्ष्यमाणविवक्षणेन तत्रातिव्याप्तिवारणसम्भवे तद्वारणाय प्रयासस्यानौचित्यमिति॥ अन्ये तु॥ वह्नीयसंयो
गेन वह्निसाध्यतायाम् धूमादिहेतावव्याप्तिः तादृशसंयोगेन घटाभावस्य तादृशसम्बन्धेन यावत्वावच्छिन्नाभा
वस्यैवैक्यात्तदीययावत्वावच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्धेरित्याहुः॥ नव्यास्तु॥ साध्यतावच्छेदकसम्ब
न्धेन प्रतियोगितावच्छेदकविशिष्टानधिकरणहेत्वधिकरणवृत्तित्वोपलक्षिततत्तदभावप्रतियोगितासा
मान्यशून्यावृत्तित्वविवक्षणीयत्वाज्जगदीशमते अवच्छेदककोट्यन्तर्गतोपलक्षणस्यावच्छेदकास्वीकारेण
तद्घटकीभूतप्रतियोगित्वाभावप्रतियोगितावच्छेदकत्वस्योपलक्षणीभूतसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रति
योगिताकत्वविरहात् प्रतियोगितायाम् तन्निवेशापेक्षयाभावांशे तन्निवेशस्य लघुत्वादिति प्राहुः॥ वस्तु
तस्तु संयोगेन घटाभावस्य संयोगेन घटघटान्यप्रमियपातदुभयाभावतया साध्यतावच्छेदकसम्बन्धतावच्छि
न्नप्रतियोगितासामान्यशून्यत्वाप्रसिद्धेरित्यस्यैवात्रैव तात्पर्यमिति।७॥ यत्तु साध्यतावच्छेदकघटकस

॥४॥ ध्मन्धेन तदभावोग्रा ह्यपूर्तितन्तुच्छं। धूमत्वप्रकारकप्रमेयवान् वन्हेरित्यत्राति व्याप्तिः वलघुतया वान्हिमन्निष्ठ
अं का॰ तादृशप्रमाविशेष्याभावप्रतियोगितावच्छेदकीभूतस्य धूमत्वादेस्स्वरूपसम्बन्धेनाभाववति धूम एव तादृश
प्रमाविशेष्यत्वस्य वृत्तेरिति जगदीशः॥ नन्वत्र विषयितया रूपत्वविशिष्टाभावमादाय रूपवान् पृथिवीत्वा
दित्यादावव्याप्तिसम्भवेन मादायकथमतिव्याप्तिर्दत्ता जगदीशेनेति। न च साध्यतावच्छेदकतावच्छेदकत्व
कसम्बन्धेन् धावच्छिन्नायास्तादृशावच्छेदकतानन्यादायिप्रयानतिरिक्तवृत्तित्वं वाच्यम्॥ वन्हित्वनिरूपित
समवायिसम्बन्धेन वन्हित्वविशिष्टस्य साध्यतायाम् धूमादिहेतौ साध्यतावच्छेदकताघटकसम्ब
न्धावच्छिन्नौ तादृशप्रतियोगितावच्छेदकत्वाप्रसिद्धेनाव्याप्तिः॥ न च साध्यतावच्छेदकताघटकसम्ब
न्धातिरिक्तसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकनिष्ठत्वएतदुभयसम्भावविशिष्टावच्छेदकताश्रयानति
रिक्तवृत्तित्वं वाच्य॥ तथा च विषयित्वसम्बन्धेन रूपत्ववदभावप्रतियोगितावच्छेदकताया तादृशो
भयसत्त्वात्तादृशाभावमादायापि नाव्याप्तिरिति वाच्यम्। एवं सति विषयितया गुणत्वविशि

ष्टाभावमादायाव्याप्तिः गुणत्वविशिष्टावच्छेदकतायास्तादृशोभयाभावसत्वादिति मैवम्॥ साध्यताव
च्छेदकताघटकसम्बन्धातिरिक्तसम्बन्धानवच्छिन्नत्वसाध्यतावच्छेदकसमानाधिकरणनिष्ठत्वोभयाभावत्वं अव
च्छेदकतायां विवक्षितत्वात् साध्यतावच्छेदकसमानाधिकरणत्वं साध्यतावच्छेदकताघटकसम्बन्धेन बोध्यं॥
ननु तथापि धूमत्वप्रकारकप्रमाविशेष्यवान् वह्नेरित्यादावतिव्याप्तिः कथमुच्यते अयोगोलकावृत्ति अभाव
मादायेति स्फुरणसम्भवात् मैवं। तादात्म्येन धूमविशिष्टस्य संयोगेन साध्यतायां वह्न्यादि हेतावतिव्याप्तेराप
त्तेः लघुतया तादात्म्येन धूमविशिष्टाभावीयप्रतियोगितावच्छेदकस्य धूमत्वस्यायोगोलकावृत्तित्वस्य च सा
ध्यतावच्छेदकताघटकतादात्म्येनाभाववति धूम एव साध्यतावच्छेदकताघटकसम्बन्धेन धूमो वर्तते ति तद्वृत्ति
यद्धूमत्वादिकं तद्भिन्नत्वस्य साध्यतावच्छेदके सत्वादित्यभिप्रायोक्तेः जगदीशस्येति ध्येयम्॥ प्रतियोगि
तावच्छेदकानतिरिक्तवृत्तित्वस्य विवक्षितत्वात् स्वसमानवृत्तिकस्यावच्छेदकं मास्त्विति शिरोमणि
णिः॥ नन्वेवमपि माकृतं सियवन्ह्यभावप्रतियोगितावच्छेदकं यन्माकृतानसीयवन्हित्वं तद्वत्तः पाति

॥ ५॥ वह्नित्वाभाववद्वृत्तित्वस्य वह्नित्वे सत्त्वेन वह्निमान् धूमादित्यादावतिव्याप्तिः॥ न चैवमपि साध्यतावच्छेदकतदितरोभ
अं॰का॰ यानवच्छिन्नत्वं प्रतियोगितायां विशेषणीयमिति वाच्यम् गुरुधर्मेण साध्यतास्थले उभयानवच्छिन्नप्रतियोगित्वाप्रसिद्ध्याऽव्याप्त्यापत्तेः
मेव स्वेतरानवच्छिन्नत्वेन प्रतियोगिता विशेषणीया॥ तथा च माहानसीयवह्न्यभावप्रतियोगितायाः स्वेतरावच्छिन्नत्वस
त्वात् स्वपदं प्रतियोगितापरं अत्र कदाचित् पर्याप्तिनिवेशनवारकन्तु शब्दान्तपरत्वपूर्वकमन्यो विभावनीयः॥—
सिद्धान्तलक्षणे यद्धर्मविशिष्टान्यत्वं प्रतियोगितायां विशेषणीयम् (विवक्षणीयम्) वै स्वावच्छिन्नत्वस्वेतरावच्छि
न्नत्वोभयसम्बन्धेनेति सामान्याभावस्य प्रतियोगित्वप्रतियोगितावच्छेदकत्वरूपमित्यभिप्रायः अत एव वह्नित्वा
द्यवच्छिन्नत्वपर्याप्तिनिवेशोऽपि संगच्छत इत्यर्थः॥— वह्निघटोभयाभावादिकं परित्यज्य तारणातारणदहनवृत्तित्व
द्वित्वावच्छिन्नाभावमादायाव्याप्तिरिति यदुक्तं तदपि संगच्छते न चैवं वह्निधूमोभयवान् वह्नेरित्यादा
वतिव्याप्तिः। तादृशोभयाभावीयप्रतियोगितायाः स्वेतरावच्छिन्नत्वादिति वाच्यं व्यभिचारिस्थलान्य
त्वविशिष्टाभावमादाय सर्वत्र व्यभिचारिण्यतिव्याप्तिवारणसम्भवात्। न च तादृशप्रतियोगितावच्छेदक

स्यवह्निधूमोभयत्वसमानवृत्तिकत्वाभावेन तादृशोभयत्वस्यपारिभाषिकावच्छेदकत्वाभावेनातिव्याप्तितादवस्थ्यमितिवाच्यम् स्वपर्याप्त्यनवच्छेदकीभूतत्वास स्व वृत्तिधर्मानवच्छिन्नपर्याप्तिकत्वस्यविवक्षितत्वात् तद्भाववद्वृत्तित्वात्वं तादृशप्रतियोगितावच्छेदकाभावव्याप्यधर्मानवच्छिन्ननिरूपकतानिरूपितत्वं वाच्यं तेनवह्निधूमोभयत्वस्यापि गौलकीयवह्निवृत्तित्वेपिनक्षतिः ॥१॥ अथप्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेवपारिभाषिकावच्छेदकत्वमितिकल्पेसमवायेनतारणातारणोभयत्वविशिष्टस्यसंयोगेनसाध्यतायाम् धूमादिहेतावव्याप्तिः पर्याप्तिसम्बन्धेन तादृशोभयत्वविशिष्टाभावप्रतियोगितावच्छेदकतादृशोभयत्वस्यसाध्यतावच्छेदकसमानवृत्तिकत्वेन तदभाववद्वृत्तित्वस्यसाध्यतावदकेसत्वेनसाध्यतावच्छेदकस्यपारिभाषिकावच्छेदकत्वात् ॥ अत्रकेचित् ॥ पर्याप्तिसम्बन्धेनसाध्यतावच्छेदकस्थलएवतारणातारणवृत्तित्वद्वित्वावच्छिन्नाभावमादायदोषमभिधानं दिधिकारस्य । साध्यतावच्छेदकघटकसम्बन्धावच्छिन्नावच्छेदकतानिवेशेतास्यप्रसक्तिः त था च साध्यतावच्छेदकताघटकसम्बन्धावच्छि

अं॰ का॰ तावच्छेदकत्वाभावेनैव पर्याप्तिसम्बन्धेनोभयत्वस्य विशिष्टाभावमादायैव न दोषः॥ ननु तादात्म्यसम्बन्धेन धूमविशिष्ट
स्य सयोगेन साध्यतायां वह्न्याद्यावृत्तिव्याप्तिरिति तत्र हि समानाधिकरणधूमविशिष्टाभावस्य प्रतियोगिताव
च्छेदकं लाघवाद्धूमत्वमेवेति तादृशाभावस्य लक्षणाघटकत्वेनान्यनिवेशाभावस्य प्रतियोगितावच्छेदकान
तिरिक्तवृत्तित्वभिन्नत्वस्य साध्यतावच्छेदके सत्वात्तद्वृत्ति। नच तादृशाभावाप्रसिद्ध्या नातिव्याप्तिरिति वाच्यम्।
तथा सति तादृशसाध्यकसद्धेतावव्याप्त्यापत्तेः। यद्विच तादात्म्येन तद्व्यक्तिविशिष्टाभावप्रतियोगितावच्छेदकत्वं
तद्व्यक्तावेव प्रसिद्धं तद्व्यक्तित्वस्य तद्व्यक्तितादात्म्यविशिष्टसमवायस्वरूपतया तस्यावच्छेदकत्वकल्प
नेलाघवाननवकाशादिति भाव्यते तदा पूर्वे साध्यकव्यभिचारिण्यतिव्याप्तिरिति चेन्न। साध्यतावच्छेदकता
घटकसंसर्गातिरिक्तसाध्यतावच्छेदकप्रतियोगिकसम्बन्धावच्छिन्नावच्छेदकत्वानिरूपकत्वस्य हेतुम
द्विशिष्टाभावप्रतियोगितायां निवेशान्न पूर्वोक्तस्थले व्याप्तिरिति अन्यत्सर्वं स्वयमूहनीयम्॥ परंतु॥ साध्य
तावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिकरणीयत्वस्वरूपसम्बन्धेन प्रतियोगि

ताश्रयाधिकरणत्वाभाववच्छेदकत्वाधिकरणवृत्त्यभावीयप्रमकेनापि सम्बन्धेनावच्छिन्नं प्रतियोगित्वमिति मते तद्
भावस्य प्रतियोगिव्यधिकरणत्वाभाववान्नलक्षणघटकमिति बोध्यम्॥ एवं रीत्यैव हेतुमन्निष्ठाभावप्रतियोगितावच्छे
दकं स्वावच्छिन्नप्रतियोगित्वसम्बन्धेन यद्धर्मव्यापकमित्याद्यकल्प्यमपि परिष्कार्यमिति॥११ ननु प्रतियोगितावच्छे
दकानतिरिक्तवृत्तिभिन्नत्वमिति लक्षणे द्रव्यत्वपृथिवीत्वोभयवान् द्रव्यत्वादित्यत्रातिव्याप्तिः। तथाहि द्रव्यत्वसमाना
धिकरणतादृशोभयाभावीयप्रतियोगितावच्छेदकपृथिवीतरासमनैतत्वं न तु तादृशोभयत्वं गौरवात्॥
तस्य च साध्यतावच्छेदकसमानवृत्तिकत्वाभिमतपारिभाषिकावच्छेदकभिन्नत्वस्य साध्यतावच्छेदके सत्त्वात् इति चेन्न।
प्रतियोगित्वन्यूनवृत्तिधर्मस्य प्रतियोगितावच्छेदकत्वाभावात्। न चैतदप्रामाणिकम् सिद्धान्तलक्षणे यो यदीयेति पंक्तिव्या
ख्याने भट्टाचार्येण स्वयमेव लिखितत्वादिति तथा च तादृशोभयाभावीयप्रतियोगितावच्छेदकं साध्यता
वच्छेदकमेव तस्य समानवृत्तिकत्वं निघ्नतरावसाध्यतावच्छेदकस्येति नातिव्याप्तिरिति भावः॥१४॥ ननु प्रमेय
स्य संयोगेन साध्यतायां भावत्वादिहेतावतिव्याप्तिवारणाय तादृशप्रतियोगितावच्छेदकं यद् न्यूनवृ

॥७॥
अंका. त्तित्वमित्यर्थः कृतोजदीशेनतन्मते यत्राभाववतः संयोगेनसाध्यताबाच्यत्वादिहेतुस्तत्रातिव्याप्तिस्तथा
हि संयोगेन तादृशसाध्याभावप्रतियोगितावच्छेदकं द्रव्यत्वमेव लाघवात् तथा च तादृशाभावप्रतियोगिता
वच्छेदकद्रव्यत्वस्य साध्यतावच्छेदकीभूताभावव्यापकत्वाभावात् पारिभाषिकावच्छेदकीभूतद्रव्यत्वप्रमा
विशेष्यत्वादिभिन्नत्वस्य साध्यतावच्छेदके सत्वादिति चेन्न भावाभावासाधारणाभावत्वं यदस्वत्रोपाधि
धितस्यैव हेतुमन्निष्ठतादृशसाध्याभावप्रतियोगितावच्छेदकत्वात् । न स्य च साध्यतावच्छेदकीभूताभा
वव्यापकत्वात् एवं साध्यतावच्छेदकीभूताकाभावव्याप्तकीभूतप्रमेयत्वस्य तादृशाभावप्रतियोगितावच्छे
दकत्वमस्वयमेव स्वीकृतमतो नातिव्याप्तिरि ॥१३॥ व्यासज्यवृत्तिनदन्यत्वान्यतररूपेण समानवृत्तिकत्वोक्तौ वह्नि
त्ववारणसम्भवेनस्वपर्याप्त्याद्विपर्यन्तानुधावनस्य प्रयोजनमाह त्रित्वादिकमिति जगदीशः ॥ ननु व्या
सज्यवृत्तित्वमैकत्वानवच्छिन्नपर्याप्तिकत्वं तथा च वह्निधूमोभयत्वानां धूमादित्यादौ वह्निघटधूम
वृत्तित्रित्वावच्छिन्नाभावसाध्यकेनाव्याप्तिस्तादृशत्रित्वनिष्ठं यदेकत्वानवच्छिन्नपर्याप्तिकत्वं तस्यता

तादृशत्रित्वाऽसत्त्वेन एकत्वानवच्छिन्नपर्याप्तिकान्यत्वरूपतद्व्यत्वस्य च तादृशोभयत्वाऽसत्त्वेन तत्स-
त्त्वाऽसमानवृत्तिकत्वविरहादिति चेन्न व्यासज्यवृत्तित्वमत्र एकत्वावच्छिन्नपर्याप्तिकान्यत्वमेवास्य
वक्तव्यं अन्यथा वह्निधूमोभयाभावप्रतियोगितावच्छेदकवान् वह्नेरित्यत्रातिव्याप्तेः तादृशप्रति-
योगितावच्छेदकत्वापेक्षया लाघवात् तादृशप्रतियोगिकत्वावच्छिन्नाभावस्य प्रतियोगितावच्छेद-
कं धूमत्ववह्नित्वोभयत्वं तादृशावच्छेदकस्य व्यासज्यवृत्तिकतया तदभावस्य वह्नित्वधूमत्वो-
[illegible]त्वावच्छिन्नाभावसमनियततया नातिप्रसक्तत्वात् तथा चैकत्वावच्छिन्नपर्याप्तिकान्यत्वरू-
पव्यासज्यवृत्तित्वं वह्निधूमघट एतत्त्रित्ववह्निधूमोभयसाधारणमेकमस्तु क्वाव्याप्तिः स्यादेवेति
बोध्यम्॥ यद्वा महानसीयवह्न्यभावप्रतियोगितावच्छेदकवान् वह्नेरित्यत्रातिव्याप्तिः साधूमा-
भावीयप्रतियोगितावच्छेदकत्वं तादृशावच्छेदकत्वापेक्षया लाघवात् वह्नित्वमाहानसीयत्वो-
भयत्वे कल्पनात् तन्निवारणायैकत्वावच्छिन्नपर्याप्तिकान्यत्वं वाच्यम्॥ वस्तुतस्तु॥ —

॥१३॥ वह्निधूमान्यतरानुयोगिकसमायेन वह्निधूमघटवृत्तित्रित्वविशिष्टस्य साध्यतायां व्यभिचारिण्यतिव्याप्तिः
अं॰का॰ नादृशत्रित्वावच्छिन्नत्वाभावप्रतियोगितावच्छेदकत्वं वह्निधूमोभयत्वे लाघवात्कल्पनीयम्॥ तस्य प्राग्
कृभिन्नत्वसमानवृत्तिकत्वविरहादित्यभिप्रायेणैव पूर्वकल्पपरित्यज्यैतत्कल्पानुसरणम् तथा
च अत्रैकत्वावच्छिन्नपर्याप्तिकान्यत्वं व्यासज्यवृत्तित्वं वाच्यमेत इति व्याप्तिवारणायेति बोध्यम्॥
॥१४॥ इदन्तु चिन्त्यते नयद्द्वयप्रविशमपेक्ष्य लाघवेन हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यत्
तत्प्रतियोगिकातिरिक्तवृत्तित्वं साध्यतावच्छेदकविशेषणमिति जगदीशः। जलत्र वह्निमान्धू
मादित्यादावव्याप्तिः हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यत्तार्णतार्णोभयत्वं प्रतियोगि
तावच्छेदकताघटकपर्याप्तिसम्बन्धेन तदभाववति घटादौ साध्यतावच्छेदकताघटकसम
वायेन वह्नित्वस्यावृत्तेः न च स्वसमानवृत्तिकत्वेनावच्छेदकं विशेषणीयमिति स्वपदस्य
साध्यतावच्छेदकपरम् तार्णतार्णोभयत्वस्य वह्नित्वसमानवृत्तिकत्वाभावादेव नाव्या

प्तिरिति वाच्यम्। तथापि तद्द्रव्यवान् एतद्रसादित्वादौ स्वसमानवृत्तिकहेतुमन्निष्ठाभावप्रतियोगितावच्छे
दकाप्रसिद्ध्या व्याप्त्यापत्तेः। न च तत्र पूर्वक्षणवृत्तित्वविशिष्टैतद्द्रव्यत्वमेव तादृशावच्छेदकत्वेन प्रसि
द्धमिति वाच्यम्। तदवच्छिन्नाभावस्य प्रतियोगित्वेऽपि अधिकरण   नयद्रूपाप्रवेशकत्वेऽपि
स्वावच्छिन्नाधिकरणत्वसम्बन्धेन सत्ताद्रव्यत्वाभयत्वविशिष्टस्य समनियतेन साध्यतायाम् पृथिवी
त्वादिहेतावतिव्याप्तेः। तत्र साध्याभावप्रतियोगितावच्छेदकत्वाघटद्रव्यत्वमेव तस्य च साध्यता
वच्छेदकपर्याप्त्यवच्छेदकीभूतधर्मानवच्छिन्नापर्याप्तिकत्वात् अन्यस्यापि हेतुमन्निष्ठाभावप्रति
योगितावच्छेदकस्य साध्यतावच्छेदकपर्याप्त्यवच्छेदकीभूतधर्मानवच्छिन्नपर्याप्तिकत्वाभावादत
स्तत्कारणाय स्वपर्याप्त्यनवच्छेदकीभूतव्यासज्यवृत्तिधर्मानवच्छिन्नपर्याप्तिकत्वेन हेतुमन्निष्ठाभा
वप्रतियोगितावच्छेदके विशेषणीयम्। तथा चैतत्कल्पे पितन्निवेशादेव वह्निमान् धूमादित्या
दौ तादृशद्वित्वावच्छिन्नाभावमादाय नाव्याप्तिरिति ध्येयम्॥ यद्वा तदवच्छेदकातिरिक्तवृ

॥ ९ ॥ त्तित्वपर्यवसन्नतदवच्छिन्नाधिकरणतादृशवृत्तितावच्छिन्नाधिकरणताकत्वस्य विवक्षितत्वात्तद्दोषद्वु

अं० का० ति । द्रव्यमपि न सत् अग्रे सत्तावान् जातेरित्यादावव्याप्तेरसंगत्यापत्तेः ॥ केचित्तु ॥ स्वपर्याप्त्यव

च्छेदकधर्मावच्छिन्नपर्याप्तिकत्वसमानाधिकरणो यो भावत्वं तादृशप्रतियोगिताव

च्छेदके विवक्षितमतो न कुत्रापि दोषः इति ॥ यत्तु ॥ हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकयाव

त्स्वपर्याप्त्यवच्छेदकत्वसम्बन्धेन तत्तद्व्यक्त्यभाववति स्वपर्याप्त्यवच्छेदकत्वसम्बन्धेन वृ

त्तित्वस्य विवक्षितत्वादिति ॥ तथा च वह्निमान् धूमादित्यादौ नाव्याप्तिरिति तन्न ॥ समवायेन

तार्णतार्णवह्निवृत्तित्वविशिष्टस्य सत्त्वेन साध्यतायां धूमादिहेतावव्याप्तेः स्वपर्याप्तिस

म्बन्धेन वह्नित्वविशिष्टाभावीयप्रतियोगितावच्छेदकवह्नित्वस्य स्वपर्याप्त्यवच्छेदकत्वस

म्बन्धावच्छिन्नाभाववति साध्यतावच्छेदकस्यावृत्तेः । न च साध्यतावच्छेदकताघटकसम्बन्धा

वच्छिन्नत्वावच्छेदकत्वनिवेशनीयम् । विशेषरूपेण संसर्गतानभ्युपगमादेव ॥ वह्नित्वनिष्ठ

तत्समवायेन वह्नित्वविशिष्टस्य संयोगेन साध्यतायाम् धूमादिहेतौ नाव्याप्तिरिति वाच्यम्। तादात्म्येन वह्नि
विशिष्टस्य साध्यतायाम् धूमादिहेतावव्याप्तेः। तादात्म्येन घटादिविशिष्टाभावीयप्रतियोगितायां घटत्वा
दिनावच्छेदात्तादात्म्यसम्बन्धावच्छिन्नावच्छेदकताकाभावस्याप्रसिद्धत्वात्। न च साध्यतावच्छेद
कताघटकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकसमानाधिकरणनिष्ठत्वोभयाभाव
निवेशान्नैष दोष इति वाच्यम्॥ सामानाधिकरण्यन्तु। साध्यतावच्छेदकताघटकसम्बन्धेन। प्रतियो
गितावच्छेदकताघटकसम्बन्धेन वा॥ नाप्यतः। रूपवान् पृथिवीत्वादित्यादौ विषयितया वाच्यत्ववि
शिष्टाभावमादायाव्याप्तेः॥ वस्तुतस्तु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूततावत्ताकः दहनवृत्ति
द्वित्वस्याभावावतिप्रत्येकवह्नौ वह्नित्वस्य वृत्तेः वह्निमान् धूमादित्यादावव्याप्तिविरहेण स्वसमानवृत्ति
कालं नोपादेयमिति। न चैवं वह्नित्वधूमोभयवान् वह्नेरित्यादावतिव्याप्तिरिति वाच्यम्। साधनसमा
नाधिकरणाभावप्रतियोगितानवच्छेदकीभूतधूमत्वस्याभाववति वह्नौ साध्यतावच्छेदकीभूतद्वि

